**अग्नि सूक्त**

अग्निमीळे पुरोहितं यज्ञस्य देवमृत्विजम् ।
होतारं रत्नधातमम् ॥१॥
अग्निः पूर्वेभि ऋषिभिरीड्यो नूत नैरुत ।
स देवाँ एह वक्षति ॥२॥
अग्निना रयिमश्नवत पोषमेव दिवे दिवे ।
यशसं वीरवत्तमम् ॥३॥
अग्ने यं यज्ञमध्वरं विश्वतः परिभूरसि ।
स इद्देवेषु गच्छति ॥४॥
अग्निर्होता कवि ऋतुः सत्यश्चित्र श्रवस्तमः ।
देवो देवेभिरा गमत ॥५॥
यदङ्गदाशुषे त्वमग्ने भद्रं करिष्यसि ।
तवेत्तत् सत्यमङ्गिरः ॥६॥
उपत्वाग्ने दिवे दिवे दोषावस्तर्धिया वयम् ।
नमो भरन्त ए मसि ॥७॥
राजन्तमध्वराणां गोपामृतस्य दीदिविम् ।
वर्धमानं स्वे दमे ॥८॥
स नः पितेव सूनवे ऽग्ने सूपायनो भव ।
सचस्वा नः स्वस्तये ॥९॥